CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S. D. P. B.

Coll. No. 598

Title Vedāntasāra Brahma Kallola (Ad. 6th)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 598 Subject: Vedānta

Title: Vedāntasāre Brahmakallola (Ad 6th)

Author: Sadānanda Scribe: —

Date of the work: — Date of the Ms.: V.S. १९९२

Place of the work: — Place of the Ms.: —

Size: 10.4" by 4.6" Extent: 6 foll

Language: Sanskrit. Script: Devanagari

Remarks: —

॥शुद्धपरमतत्त्वायनमः॥ ॥श्री॥ ॥श्रुत्वात्मैकतत्त्वंपरमंविशुद्धंसत्यंस्वबोधेगगनोपमोहं॥चिदात्मबोधंविमलंविशु
द्धंतंतत्त्वबोधस्वयमेवबोधं॥१॥सोहंदेवइतिश्रुतिनिगदितंचिद्बोधमेकोहरिः॥पूर्णानंदमनंतमव्ययखिलंसर्वात्म
कंसर्वगः॥१॥अज्ञातःशिवतत्त्वमद्वयमितोमद्दारुचिन्नःशिलांव्योमाकारमखंडंविज्ञायशिवंखंडःहतताराध्य
नि॥२॥अखंडंखंडयन्मूढोमृच्छिलाचारुचित्रितः॥भावयेद्भिन्नबुद्धिःस्यादज्ञानीपातकीपुमान्॥३॥क्वब्रह्माक्वशि
वोविष्णुःक्वेंद्रादिमुनीन्द्रादयः॥यावन्नविंदतेतत्त्वंतावद्भ्रांतिविकल्पना॥४॥पूर्णानंदःस्वयंज्योतिःस्वप्रकाशोनि
रंजनः॥बोधात्मासर्वगःशांतोसोहंदेवःसदाशुचिः॥५॥यस्याधारेस्थितंविश्वंउत्पन्नंत्रलयंभवेत्॥अकल्पितः
स्वयंदेवःचिन्मात्राकारणोहरिः॥६॥यस्यमध्येस्थितंविश्वंविश्वरचितात्मकं॥अनाशोव्ययदेवोयःसदेवःपरमात्मकः॥
७॥नदेवश्चक्रपाणिश्चनदेवःशूलधारकः॥नविधिःसवितेंद्रश्चसदेवोयःसदाव्ययः॥८॥सर्वाधारमनाधारंस १
र्वाश्रयमनाश्रयं॥सर्वकर्तृत्वकर्ताचसर्वसाक्षीअनामयं॥९॥वाङ्मनोगोचरात्मानंवदतिश्रुतिसर्वदा॥मनो

दृष्टिरगम्यंचध्यानमंत्रंकथंचरेत्॥१०॥नतत्रगम्यतेचित्तंयत्रवाचानिवर्त्तते॥दृष्ट्यागोचरमात्मानंध्यानमंत्रंकथंश्रु
तिः॥अखंडंध्यायतेनित्यमाकारंकथमर्चयेत्॥अनिर्वाच्यंकथंजाप्यंनिर्द्वंद्वःस्वयमात्मनि॥११॥दृश्यतेश्रूयतेयद्वत्क
ल्पितःचित्तविभ्रमः॥स्थिरदेवःस्थिमुक्तार्थानिस्वयंचात्मानमव्ययं॥१२॥ ॥इतिश्रीशुद्धसारस्यवेदांतेदेवार्चनोनामप्रथ
मोध्यायः॥ ॥वैष्णवाविष्णुभक्ताश्चशैवाशिवविमोहिताः॥शाक्तिकाःकौलमार्गेणयंत्रमंत्रसमाश्रिताः॥१॥अर्हि
सार्थरताजैनास्तार्किकास्तर्कवादिनः॥मीमांसायज्ञकर्त्तारःकर्मबोधात्मवादिनः॥२॥कर्त्तानैयायकाःशाक्तास्तल्लाका
ममतेरताः॥ब्राह्मणाःकर्मनिष्ठाश्चशुचिःस्नानक्रियादिभिः॥३॥मिष्टान्नारियठेदेदगुरुदेवसमाश्रिताः॥हत्तामा
तुःपितुर्नभक्तिःनार्थदेवार्चनास्तथा॥४॥यज्ञाग्निहोत्रवेदाश्चऋषिर्देवादिभिर्मतैः॥ब्रह्मचारीव्रतेनिष्ठाहोमस्नाना
दिकर्मसु॥५॥गृहस्थाश्चगृहेसक्ताममतापरिवेष्टिताः॥पुत्रदाररतास्तेषांमोहपाशेषुबंधिताः॥६॥अहंकार
मदोन्मत्ताकामक्रोधसमन्विताः॥वासनापूरितास्तेषांब्रह्मज्ञानविवर्जिताः॥७॥वानप्रस्थावनेस्थित्वागिरिको

टरमाश्रिताः। पत्रमूलफलाहारा वासोभिर्वल्कलैर्युताः॥७॥ धूम्रपानरताः केचित् केचित्पंचाग्निधारकाः। भिक्षाप्रवा
सिनः केचिदूर्ध्वपादोधमस्तकाः॥८॥ भिक्षुका दंडधारिश्च कुटीचराश्च बोधकाः। हंसाः परमहंसाश्च नज्ञातस्तत्व
निश्चयाः॥१०॥ एकांगुष्टतपः केचित् केचित्तीर्थनिवासिनः। नग्नव्रतधराः केचित् केचिच्चीवरधारकाः॥११॥ भस्मांगले
पिनाः केचित् निराहारव्रते स्थिताः। व्रतोपवासिनः केचित् पयःपानरताः सदा॥१२॥ शीतजले रताः केचिद्धुम्रेग्नौ च
रतास्तथा। केचिन्निराश्रये मध्ये पर्वते गिरिगह्वरे॥१३॥ जटाभाररताः केचित् केचित्लुंचितमुंडिताः। केचित्तु धारय
ते काष्टान् केचित्तु द्वादशमालया॥१४॥ स्तोत्रपाठरताः केचित् जपमंत्रसमन्विताः। विशुद्धमनसः स्मार्त्ता नेत्रा भेदमते
स्थिताः॥१५॥ श्रौताः शाक्तिकजैनाश्च विविधे काम्यकर्मणि॥ सर्वे भेदमते लीनाः शुद्धमेकोऽप्यनामयः॥१६॥ स्नानदानस
मायुक्ताः सर्वे भक्तिसमाश्रिताः। एवं मार्गा ह्यनेके च बुद्धिभिर्मतमेव चा॥१७॥ नाभिन्ना विषयैर्ग्रस्ता ब्रह्मज्ञानविव २
र्ज्जिताः। अनुष्टानरताः केचित्योगसाधनतत्पराः॥१८॥ देहसंरक्षणार्थास्ते ब्रह्मज्ञानविवर्ज्जिताः। धर्म्मार्थकाम

मोक्षेषु वासना दृढमंगिता॥१९॥ न ज्ञानं देहभावश्च न ज्ञाने भक्तिभावनाः। न ज्ञानमसवश्चेति ज्ञानं स्वात्मविचारणा॥
२०॥ पाखंडं बहुधा भेषादंभाहंकारसंयुताः। ममताबुद्धिसंग्रस्तास्तस्य मुक्तिः कुतो भवेत्॥२१॥ न मुक्तिः शौचक्रियया
प्रणवेन च मुक्तिर्दं। स्तोत्रपाठेन नो मुक्तिर्ज्ञानेन मुक्तिर्भविष्यति॥२२॥ ब्रह्मज्ञानरतो यस्तु जीवन्मुक्तः स उच्यते। कर्मबंधा
त्प्रमुच्यंते यांति ब्रह्म च सत्तां गतिम्॥२३॥ ॥ इति श्रीनित्यदर्शनात्मबोधे नाम द्वितीयोध्यायः॥२॥ ॥ नानाजन्मकृतं सुकृत
बहुविधं दानादियज्ञादिकं जाप्यं मंत्रमतेवृत्स्तोत्रपठनं स्नानं त्रिकालं सदा। योगोष्टांगविधानध्यानसहितं देवार्च
नं तीर्थनिः। कृत्वा कर्मसिनेकभावसहितं नाहं पदं प्राप्यते॥१॥ ब्रह्मज्ञानमयोपि निर्म्मलनिराभासोहमात्मा स्वयं। आ
नंदोयमनंत मे कृसफलं ज्ञानात्मनो हे हरिः। ब्रह्मानंदसुधाब्धिमध्यमहं विश्वं भवेत् बीजवत्स्वर्णानंदमहं विभाति
सनतं ब्रह्मत्वहं नान्यथा॥२॥ न ज्ञानं ब्रह्मवेदो वदति रुक्मोहं ब्रह्म वदति वेदो यजुः सामवेदो वदति तत्त्वमसीति ब्र
ह्मास्म्यहं ह्यथर्वणः। अहं ब्रह्मास्मीति चैव वदति श्रुतिर्देह मिथ्याभ्रमेति॥ मुक्तौ रौप्यं यथा तथा हि सद्द्वैतं तद्बुद्धिर्मां

तं जगत्॥३॥ भ्रांतिर्नेद्विरोधमद्वयंश्चिवोजीवत्वमंजायते। कार्योपाधिरयं प्रपंचमखिलं चात्मास्यविद्याश्रयः॥
राहुश्चस्तदिवाकरेंदुसदृशो नानात्वमाभ्रियथा। सत्त्वं चिन्मात्रमयोपि हंसविमलं त्वेकं च चिन्मात्रकं॥४॥ नानावर्ण
मनेकधेनुसकलं दुग्धस्यधात्वेकतो। भ्रज्ञांज्ञानिसनेकवर्णबहुधाचानेकधादृश्यते॥ हेमत्वेकमुपाधिनेदवशगं भू
त्वाबहूनूषणं। एवं तत्वसमानमेकमकलं भिन्नत्वविद्याभ्रमः॥५॥ ज्ञातं शास्त्रमते पुराणनिगमे तर्केमीमांसके तथा। वेदां
ते विमले विशुद्धसुमते भेदे विभेदे मते। शैवे शाक्तजिने मते च विविधे काराभतेकर्मणि। सर्वेत्रैद्रमेव विशुद्धसमह
माराध्यमेकोप्यहं॥६॥ ॥इतिश्रीतत्वउपदेशो नामतृतीयोध्यायः॥३॥ ॥निर्मलं निश्चलं विज्ञानमयं निरुपाधिपरा
त्परं॥ शांतं शुद्धसमाधिनेदरहितं अद्वैतबोधात्मकं॥ साविद्याजडमेकमन्मसमचलं त्वेकं न चेन्नचिन्मः॥ जनोन्नतमिदं प्र
पंचमखिलं तत्त्वं वद श्रीगुरो॥१॥ श्रुत्वावाक्यमिदं गुरुर्वदति वचो बोधत्वशिष्यं शृणु। स्वात्मानिश्चलमेकमद्वयमयो सा ३
विद्ययातद्गतः। रज्जुं वक्रलोहयथा द्वयोपिरचलं दृष्ट्वा भ्रमो भ्राम्यते। तद्वत् आत्मसविद्ययोभ्रमवशो जीवत्वसंजायते।

॥२॥ मुक्तरेयद्वद्धिंबलिज्ञतिमुखवंतद्वदविद्यात्मनि। भ्रत्वानयेतिविश्वमेकमखिलं बिंबंपृथक्मायया॥ यद्वत्सो ज्वलति
तिष्ठतिमणि श्रीलाश्योभित्रकाशेरवौ। उत्पत्तिर्भवतिस्वभावमनलो तद्वात्मविद्याजगत्॥३॥ भानुप्रकाशेन मरीचिका
जलं स्वभावमुत्पत्तिर्यदृष्टयारविः। आत्माप्रकाशेनयथाखिलं जगत्कृतं निभोक्तास्तुभयोपि चात्मनि॥४॥ यथाप्रका
शेन बिंबतिछायाबिंबस्यछायया मभिन्नं तथायं। आत्माप्रकाशेन दृश्यतिविश्वं न भिन्नं चात्मनिमायया जगत्॥५॥
॥ ॥इतिश्रीअद्वैतबोधोनाम चतुर्थोध्यायः॥ ४॥ तुर्यातीतं परं तममलमचलं साक्षि निर्वाणरूपं निर्विकल्पं चनि
र्मोहं त्रिगुणरहितं सच्चिदानंदं निर्विशेषं। भावातीतं तत्वमयपरमपुरुषं शाश्वतं दिव्यरूपं अधोर्ध्वमध्ये नप्रणं चरा
चरगतं साक्षिरूपं शिवोहं॥१॥ देहोनाहं न चेंद्रियं न भवति मनो नैव बुद्धिर्न चाहं नाहं ब्रह्मांडं न पिंडं न भवति सुरा नैव
वेदांतयज्ञाः। नाहं कर्मनि भोक्ता न विषयरता न बालवृद्धो न न वृद्धा सोहं विज्ञानमेकमवचनपरं साक्षिरूपं तुरीयं॥२॥
सुप्ते चित्ते प्रलीने ह्यखिलतममतेश्चन विद्याविलासे जीवे ब्रह्मत्वमेकं विषयविनिहिते तत्स्वचैतन्यबोधो विनश्यति

योगनिद्रां जगति अखिले आत्मसाक्षिस्वरूपेऽहंकारादिर्लिंगदेहे सज्जीवमुपगते प्राज्ञशरीरप्रकाशे ॥३॥ स्वप्ने या
स्मन्देहे जीवति धृते चित्तस्तु चोत्पद्यते चित्ते ब्रह्मलिप्तविश्वविचित्रसर्वकुमायाया अनेकप्रचतिः तत्काले सुदृष्टं विभाति
मद्बलं सा विद्यया भ्राम्यति तत्साक्षि त्वमहं चिदात्ममममलं नो भिन्नमेकोऽहं हरिः ॥४॥ सर्वे वासनया धृतं च दृष्टं
देहे तथा पार्थिवे तत्त्वं च त्वममेति भ्रयत्रिगुणं विश्वं तथा पंचकं धातुः सप्त तथा त्रयस्तमनुप्राणादि वायुर्दशः अं
तःकरणचतुष्टयेंद्रियमहं विश्वं प्रकाशं कुरु ॥५॥ दृश्यति माया मविद्यया जगत् ॥ स्वभावतस्तन्निर्लयप्रयाति ।
ब्रह्माणमीशं च विष्णुमनादिकृत्तोत्पत्तिपालनहेतुमंतु ॥६॥ ॥इति श्री अवस्थात्रयबोधो नाम पंचमोऽध्यायः ॥
॥५॥ ॥भान्ति बिंदु गगने तारा दृश्यंते सलिले यथा ॥ तथा हि दृश्यते तत्र तद्वत् आत्मनि मायया ॥१॥ दर्पणे दृश्यते बिं
बं दृष्टा तत्र न विद्यते । तथैवात्मा जगद्रूपं दृश्यते नात्र संशयः ॥२॥ पूने बुद्बुदाश्च बिंबे जले मुसत्तिलीयते ॥ तथो ६
पाधि जगत्सर्वमात्मन्येवं प्रलीयते ॥३॥ नामरूपादिकं सर्वं मिथ्या सर्वेषु विभ्रमः ॥ अज्ञाने मोहिता मूढाः याव

त्तत्त्वं न विंदते ॥४॥ नामरूपाद्यतीतस्य मनश्चक्षुरगोचरः ॥ सोऽहं ब्रह्म चिदानंदो नाहं देहो न पावृतः ॥५॥ नाहं देहो
न मे देहो देहभिन्नचिदात्मनि ॥ निःप्रपंचो निराभासो साक्षी निरुपाधिर्निराश्रयः ॥६॥ जीर्णवस्त्रे यदा देहो देहस्थो
वा सदृश्यते । तथा देहस्थितो देही भिन्नएव हि केवलं ॥७॥ घटे पश्यति यो न[illegible]घटभिन्नोपिलक्ष्यते । तथा देहस्थमा
त्मानं देहभिन्नोपिलक्ष्यते ॥८॥ गृहस्थस्य गृहे यद्वत् चित्रं तिष्ठति सर्वदा । न तद्रूपं गृहस्थस्य देहोपि तद्वदात्मनि
॥९॥ क्षीरमध्ये यथा सर्पिः काष्ठमध्ये यथानलः । देहमध्ये तथात्मापि ज्ञानिनस्तं प्रपश्यति ॥१०॥ भानुदये यथा
दीपमप्रकाशं च दृश्यते । तथा ज्ञाने जगत्सर्वं मिथ्या सर्वत्र नान्यथा ॥११॥ तप्तलोहे यथा चाग्नौ नाजित्तमुनयोरपि
देहबुद्धिस्तथा चात्मा सुखदुःखेन पीड्यते ॥१२॥ यथा देवालये देवो संस्थितोपि विभेदतः ॥ तथा देहेषु चात्मायं
भिन्नएव हि केवलं ॥१३॥ यद्वत्सदसत्तल्लक्षणस्यास्ति नास्ति नारूपं न वेत्ता नेति चेति ब्रूयं तस्य निर्हेतु परमं प
दं ॥१४॥ भ्रमरूपा तथा माया विकल्पश्चिन्त्य विकल्पना ता ध्यानमत्र व्यर्थं सज्ञानं दस्य चात्मनः ॥१५॥ साक्षि

त्मा तज्जगत्सर्वं जगद्भूतं च वस्तुनः॥ दृश्यमेव हि द्रष्टा स्यात् ध्रुवः श्रेष्ठो हरिर्हरो॥१६॥ अनेकविम्बहृद्विम्बप्रकाशात्मा
मनःस्थितिः॥ ज्ञानेन रश्पतितन्नानुत्तेजस्वी नरसंगता॥१७॥ वृक्षबीजद्वयोर्मध्ये मोक्षं किं वक्तुं शक्यते॥ आत्मानं स्व
प्रकाशश्च नो वेत्ति मूढचेतसः॥१८॥ अखंडं गगनाकारं सर्वत्तितं न विष्पति॥ सर्वत्तितं सर्वसाक्षी निराकारं नि
रामयं॥१९॥ केवलं विषयो जीवो चैतन्यं चात्मनि स्थितं॥ ब्रह्मबीजमयं नित्यं निर्भ्रांतिस्तत्र केवलं॥२०॥ यथामृत
स्तंतरखंडं न त्वाभिन्नं न तत्कृते॥ यथा नश्पतितद्विम्बं न भिन्नं विम्बचात्मनि॥२१॥ यथा जले जलं क्षिप्तं न भिन्नं जलमुच्य
ते॥ तथा प्रकर्णे यमात्मा च न भिन्नं वर्तिनानिमे॥२२॥ नास्ति विद्या क्वचित्काले तिष्ठ स्वात्मन्यथात्मये॥ पूर्णानंद
स्वमात्मानं स्वयमेव प्रकाशते॥२३॥ अहमेव स्वयं ब्रह्म न भिन्नं दृश्यते मया॥ आत्मैव केवलं ब्रह्मरूपं वर्णाश्रमो
भवेत्॥२४॥ आनंदं वा निरानंदं शुद्धं वाशुद्धमेव वा॥ भावाभावसमानं च आत्मानमहं केवलं॥२५॥ साकारं वा निरा ५॥
कारं नानेकं समतत्वतः॥ सत्तासत्ता विभागं मोहमात्मा च केवलं॥२६॥ स्थितं वाप्यथवा द्वैतं नद्वैतं वा तत्त्वमेव वा॥ नि

त्यानित्यविहीनश्च सोहमात्मा च निस्पृहः॥२७॥ सर्वं चैवममूर्त्तं च सकलं सत्त्वनयापहः॥ अस्ति नास्ति नयोर्भेदो हि संकोहंस
छिद्रात्मकः॥२८॥ सत्संज्ञानमनंतोहं शुद्धोहं स्वप्रकाशकः॥ पूर्णानंदो द्वयः साक्षिन्तोहं सर्वगो हरिः॥२९॥ सदानंदो शु
चिर्बोधो न मोहो न निराश्रयः॥ शुद्धत्वं निर्गुणं ब्रह्म बंधमुक्तिः कुतं मम॥३०॥ न कर्त्ता नैव भोक्ताहं निःशंको वा निराश्र
यः॥ शुद्धबुद्धस्वरूपोहं स्वप्रकाशो निरंजनः॥३१॥ सर्वस्यात्मानमात्मानं सर्वं नास्ति विधिभ्रमः॥ यस्तु पश्यति विकारस्यापि व
तं विश्वं स पश्यति॥३२॥ सकलं त्वं तिनयोर्भेदो न तन्मिथ्या दृश्यते जगत्॥ अद्वैतं परमं शांतं तस्मात्मा महं केवलं॥३३॥
यत्र धर्मे रताः शूराः युद्धे जयपराजिताः॥ तद्ब्रह्म वेदांतिनो ज्ञानहीना नात्मबुद्धयः॥३४॥ ज्ञानेन रश्पतिकर्माणि सज्जन
समरसं गताः॥ त्यक्त्वा कर्म च निःशेषं निर्द्वंद्वस्थितयोगिनः॥३५॥ वारिमध्ये स्थितं पद्मं स्थित्वा तत्र न लिप्यते॥ तथा
ब्रह्ममयो योगी न कर्माणि शुभाशुभैः॥३६॥ देहाभिमानिनो लिंगं स्वयमात्मा प्रकाशते॥ यत्र यत्र गतं चित्तं स
माधौ तद्विलीयते॥३७॥ शरीरं व्यापितं येन भुवनानि चतुर्दश॥ निश्चलं निर्मलं देहे सर्वव्यापी निरंजनः॥३८॥ अ

हं ब्रह्मेति मांध्यायेत महात्मानं च संस्थिता। सर्वस्वरूपश्चैवात्मानं स्वयं ब्रह्म न संशयः।३९। बहुधा चात्मने दृश्यं बहुप्र

वृत्तिर्निवर्तकः। ब्रह्मज्ञानं स्वयमेव आत्मबोधप्रकाशकः।४०। प्रवृत्तिर्बहुधा लोके निवृत्तिर्नैव दृश्यते। निवृत्तिश्च

स्वयं ब्रह्म न पश्यंति दुराशयाः।४१। ॥ इति श्री श्री रंगजी वेदांतसारे परमहंसज्ञाने ब्रह्मब्रह्मोल्लप्रकाशो नाम ष

ष्ठोध्यायः॥ ॥संवत् १८४२ वर्षे माघशुद्धपक्षरवौ लिखितं॥ ॥श्री॥ ॥शुभमस्तु॥ ॥श्री ब्रह्मणे नमः॥ ॥

॥ग्रंथसंख्या १२५॥